श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपादूर् पुराभिजन सरलकवि श्रीराघवाचार्य कृतं

# ॥ श्री महालक्ष्मी सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री महालक्ष्मीसुप्रभातस्तुतिः ॥

विष्णुकान्ते महालक्ष्मि पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ शेषपर्यङ्कात् कर्तव्यं दैवमाह्निकम्॥ १ ॥

उत्तिष्ठोष्ठ गोविन्दप्रिये जागृहि जागृहि।
सिन्धुजे जगदंब त्वं त्रिलोकीमङ्गळं कुरु॥ २ ॥

जगन्नाथमनः कान्ते जगदंब दयानिधे।
पाहि पाहि शुभालोकैस्त्वदपत्यमिदं जगत्॥ ३ ॥

ओङ्कारक्षेत्रसंभूते मातरोङ्कारविग्रहे।
ओङ्कारगर्भगे देवि दयया परयाऽव नः॥ ४ ॥

तव सुप्रभातमयि दुग्धसिन्धुजे
 भवतु प्रसन्नवदने दयामयि।
द्रुहिणादिदेववनिताकृतार्हणे
 श्रुतिगीयमान विभवे हरिप्रिये॥ ५ ॥

त्रैलोक्यमातरखिलेश्वरि वासुदेव-
 वक्षोविहाररसिके करुणागुणाढ्ये।
स्वामिन्युपाश्रित जनेप्सित दानदक्षे
 भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ ६ ॥

प्राच्यामुदेति सवितार्पितपङ्कजश्रीः
 विप्रा विशुद्धतनवो मुदितान्तरङ्गाः।
भक्त्या कृताञ्जलिपुटास्तव धाम यान्ति
 भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ ७ ॥

कोकाः प्रहृष्टमनसस्स्ववधूपगूढाः
 घूका विशन्ति धरणीरुहकोटराणि।

www.prapatti.com

कुत्राप्यलीयत तमोभिरहो अशेषैः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ ८ ॥

भाण्डप्रपूर्णदधिमन्थनसंप्रवृत्त-
गोपीजनस्य करभूषणनादमिश्रः।
गीतध्वनिस्तव यशोभिरयं विभाति
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ ९ ॥

ब्रह्मेशशक्रदयिताः पतिभिस्सह स्वैः
त्वद्वीक्षणं शुभकरं बत लब्धुकामाः।
धाम त्वदीयमुपयान्ति सुवस्तुहस्ताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १० ॥

प्रेमप्रकर्षत इयं परिलीढवत्सा
धेनुस्त्वदीयकरुणेक्षणजातपोषा।
त्वद्विश्वरूपविधये निहिता पुरस्ताद्
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ ११ ॥

त्वत्प्रीणनाय ननु हेषत एष वाजी
दन्तावलोऽपि परिबृंहितबृंहितोऽयम्।
नार्यो नराश्च धृतमङ्गळवस्तुजाताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १२ ॥

सुप्तोत्थिता जननि पञ्जरमध्यभाजो
लीलाशुकास्सपदि भुक्तपयः फलाद्याः।
नामानि ते परिपठन्ति सुपावनानि
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १३ ॥

सत्पुण्यराशिखनिभारतभूनिवासि
साधुप्रियङ्कर मनोहरदिव्यमूर्ते।
आर्तार्तिहारिणि दयामयि लोकमातः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १४ ॥

www.prapatti.com

एलादिचूर्णघनसारविमिश्रतीर्थ-
संपूर्णकाञ्चनघटान् शिरसा वहन्तः।
सन्तो विशन्ति भवनं तव वाद्यघोषैः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १५ ॥

क्लृप्ताह्निकाः श्रुतिविदः शुभशीलवृत्ताः
शुद्धा इमेऽत्रभवतीपरिपूजनाय।
त्वत्पादपद्ममुपसेव्य नुवन्ति भक्त्या
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १६ ॥

इन्द्राग्निधर्मपतियातुपपाशिवात-
यक्षेशभूतपतयोऽष्टदिशामधीशाः।
सेवापरास्तव कृताञ्जलयो विभान्ति
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १७ ॥

एते ग्रहा नव रवीन्दुसुतेन्दुभौम-
स्वर्भानुकेतुसुरगुर्वसुरार्यमन्दाः।
त्वत्किङ्करास्तव पदाब्जनिषेवणोत्काः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १८ ॥

मन्दाकिनीजलविगाहनपूतदेहाः
सन्ध्यामुपास्य ऋषयो ननु सप्त दिव्यैः।
पुष्पैस्त्वदर्हणविधौ त्वरयोपयाताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ १९ ॥

वाल्मीकये मुनिवराय निजोपदिष्टं
त्वत्कान्तमानसवशीकरणप्रवीणम्।
गायन्नुपैति चरितं तव नारदोऽयं
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ २० ॥

स्वर्लोकनिर्वहणकर्मणि यस्य मेधां
इन्द्रस्समिच्छति सदा स गुरुः सुराणाम्।

www.prapatti.com

धाम्नि स्थितः पठति तेऽद्य दिनस्य शुद्धिं
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ २१ ॥

त्वद्वेश्मनि प्रियमहोरसि भासमान
सद्रत्नदर्पणसमीक्षणकैतवेन।
सौभ्रात्रभूम बहुमानितकौस्तुभेऽम्ब
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ २२ ॥

नानावपूंषि भजतः श्रितरक्षणार्थं
पत्युः प्रियास्तदनुरूपतनूः श्रयन्ति।
तद्धर्मसाह्यकरणाच्चरितार्थितस्वे
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ २३ ॥

मानातिलङ्घिमहिमैकनिकेतभूते
दीनार्तिधूननचणस्वदयेऽनवद्ये।
ओङ्कारपत्तनसुभाग्यफलायितात्मन्
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम्॥ २४ ॥

विश्वं विभाव्य भवसागरमग्नमद्धा
तद्रक्षणे करुणयात्तशुभाष्टमूर्तिम्।
ओङ्कारनामनि पुरे कलिताधिवासां
पश्येम भर्तृसहितां शरदः शतं त्वाम्॥ २५ ॥

महालक्ष्मीसुप्रभातस्तुतिं ये
नराः शुद्धाः प्रत्यहं संपठन्ति।
यशस्तेषां वाग्मितां वाञ्छितं च
स्वयं लक्ष्मीः सुप्रसन्नाः विधेयात्॥ २६ ॥

वेदान्तदेशिकपदांबुजभक्ति भाजा
श्रीराघवेण कविना सरळेन गीता।
श्रीसुप्रभातविषया स्तुतिरच्छभावा
लक्ष्मीं धिनोतु हरिमप्यनघा सदैषा॥ २७ ॥

॥ इति श्री महालक्ष्मीसुप्रभातस्तुतिः समाप्ता ॥

www.prapatti.com

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री महालक्ष्मी स्तोत्रम् ॥

अखिलागमसारविदां यमिनां हृदयाब्जविहारकुतूहलिनी।
विनमज्जनताभिमतार्थकरी विजयस्व रमे हरिणा सततम्॥ १॥

स्मयमानसुरम्यमुखाम्बुरुहा दयमानमनाः प्रणतेष्वनिशम्।
प्रणवे नगरे दययोदयिनी विजयस्व रमे हरिणा सततम्॥ २॥

चतुरास्यमुखैरखिलैरमरैः कृतनैजमहामहिमस्तुतिका।
विकचाम्बुरुहेण सुधामवती विजयस्व रमे हरिणा सततम्॥ ३॥

अतिदुस्सहदुःखकरैरमितै र्दुरितैर्भरितं बहुजन्मकृतैः।
परिपालय मां पदयोः पतितं विजयस्व रमे हरिणा सततम्॥ ४॥

सुमुखी शुभदा सुगुणा सुलभा श्रितसज्जन रक्षण विधि प्रथिता।
सुगतिर्निखिलस्य जनस्य मता विजयस्व रमे हरिणा सततम्॥ ५॥

प्रबलारिजिगीषुवलारिमुखै र्हरिसाह्यमुपेत्य पुरामथितात्।
अयि दुग्धमयादुदिते जलधेः विजयस्व रमे हरिणा सततम्॥ ६॥

परिपश्यति सर्वसुपर्वगणे भगवद्भुजमध्य निशान्तगता।
प्रथिता परमात्म सुलक्ष्मतया विजयस्व रमे हरिणा सततम्॥ ७॥

अवनीतनयात्वमुरीकृतवत् त्वयि रामहरेर्दयिता भवती।
प्रकटीकुरुते स्म सती सुविधीन् विजयस्व रमे हरिणा सततम्॥ ८॥

विना विष्णुकान्तां गतिर्नो गतिर्नो सदा विष्णुकान्तां स्मरेयं स्मरेयम्।
रमे विष्णुकान्ते प्रसीद प्रसीद प्रियं विष्णुकान्ते प्रदेयाः प्रदेयाः॥ ९॥

अहं विष्णुकान्ते त्वदीयाङ्घ्रिपद्मौ सुदूरादिहागत्य भक्त्या प्रणम्रः।
यथाऽऽनन्दसिन्धौ निमग्नस्सदास्यां तथा मे प्रसीद प्रसीद प्रसीद॥ १०॥

www.prapatti.com

अशेषानपि दोषान्मे प्रमादादसकृत्कृतान्।
क्षमस्वाम्ब क्षमस्वाम्ब महालक्ष्मि हरिप्रिये॥ ११ ॥

प्रणतसुरासुर मणिमकुटाञ्चित कोमलपाद सरोजयुगे
भवदवशोषण बहुल भयातुर रक्षण दक्षिणदृक्प्रसरे।
परिसरभास्वर निजजनसाधित पावनपूजन हृष्टमनाः
चिरमिदमावस हरिदयिते पुरमोम्पदमिष्टकरी कृपया॥ १२ ॥

॥ इति श्री महालक्ष्मी स्तोत्रं समाप्तम्॥

www.prapatti.com

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री महालक्ष्मी प्रपत्तिः ॥

भवांभोधौ मज्जतां मादृशानां
प्रणम्राणां रक्षणे सानुकम्पाम्।
स्वभर्तारं सस्मितं चोदयन्तीं
महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ १ ॥

समाम्नायैर्गीयमानानुभावां
गुणैस्सर्वैर्भासमानां शुभाङ्गीम्।
कृपावृष्टिं तन्वतीमाश्रितौघे
महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ २ ॥

मुनीनां हृत्पङ्कजे राजहंसीं
सुरैर्नित्यं पूज्यमानाङ्घ्रिपद्माम्।
हरेर्वक्षस्यात्तवासां प्रहृष्टां
महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ३ ॥

स्वसंस्मृत्या शोषिताशेषपापां
सदाश्लेषात्तोषितात्मेशचित्ताम्।
नमद्वर्गे वात्सलीं संदुहानां
महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ४ ॥

पुरा देवैर्मथ्यमाने सुधार्थं
पयःपूरे दुग्धसिन्धोरुदीताम्।
दिशस्सर्वा भासयन्तीं स्वदीप्त्या
महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ५ ॥

सुरव्राते प्रेक्षमाणे समस्ते
विशन्तीं हे विष्णुवक्षो विशालम्।

www.prapatti.com

हरेर्वक्त्रं सस्पृहं वीक्षमाणां
    महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ६ ॥

स्वयाभासा सर्वतो भासयन्ती-
    मिहोङ्कारक्षेत्र आविर्विभूताम्।
दयापूरैर्विश्वमाप्याययन्तीं
    महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ७ ॥

सतस्त्रातुं प्राप्तनानावतारे
    निजे पत्यौ स्वीकृतानेकरूपाम्।
सखीभावादैकमत्यं दधानां
    महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ८ ॥

विहारार्थं कोमले शेषभोगे
    सतां चित्ते निर्मले वेदमौळौ।
समं पत्या मातरं तां शयानां
    महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ ९ ॥

इयं वाणी स्ताविका त्वद्विभूते-
    र्भवानीयं चामरग्राहिणीति।
वचोभङ्गीं शृण्वतीं किङ्करीणां
    महालक्ष्मीं त्वां शरण्यां प्रपद्ये॥ १० ॥

लक्ष्मीप्रपत्तिमेतां कविना सरळेन राघवेणोक्ताम्।
यः पठति तस्य कामाः लक्ष्म्याः कृपया तदैव सिध्यन्ति॥ ११ ॥

॥ इति श्री महालक्ष्मी प्रपत्तिः समाप्तः ॥

www.prapatti.com

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमहालक्ष्मी मङ्गळम् ॥

वेदान्तवेद्यविभवे विष्णुवक्षोविहारिणि।
अरविन्दाक्षदयिते लक्ष्म्यस्तु तव मङ्गळम्॥ १ ॥

सर्वमङ्गळमाङ्गळ्ये सर्वमङ्गळदेवते।
सर्वमङ्गळया स्तुत्ये लक्ष्म्यस्तु तव मङ्गळम्॥ २ ॥

पद्मसद्मे पद्महस्ते पद्मलोचनभामिनि।
पद्मभूपूजिते नित्यं लक्ष्म्यस्तु तव मङ्गळम्॥ ३ ॥

इन्द्राणी मुख गीर्वाणी गणसेवा प्रहर्षिणि।
सर्वेषां जगतामम्ब लक्ष्म्यस्तु तव मङ्गळम्॥ ४ ॥

त्वदिङ्गितपराधीनो हरिस्सर्वेश्वरोऽपि सन्।
कुरुते निखिलं कर्म लक्ष्म्यस्तु तव मङ्गळम्॥ ५ ॥

इन्द्राय त्यक्तशापाय त्रैलोक्यैश्वर्यदायिनि।
अष्टभिर्मूर्तिभिर्जुष्टे लक्ष्म्यस्तु तव मङ्गळम्॥ ६ ॥

सुपर्वभिस्सदाराध्ये शोभावति शुचिस्मिते।
सर्वकामप्रदे देवि लक्ष्म्यस्तु तव मङ्गळम्॥ ७ ॥

शुभानि निजनामानि सदावर्तयतां सताम्।
मुदा श्रेयोविधायिन्या लक्ष्म्यस्तु तव मङ्गळम्॥ ८ ॥

सतामात्महविस्त्यागक्रियोद्देश्यतया स्थिते।
कान्तेन हरिणा साकं लक्ष्म्यस्तु तव मङ्गळम्॥ ९ ॥

स्वदृष्टिगोचरस्थानसिध्यत्संपत्समृद्धिके।
विलसत्सर्वकल्याणे लक्ष्म्यस्तु तव मङ्गळम्॥ १० ॥

www.prapatti.com

दिव्यं स्थानं परित्यज्य पत्या सह नमस्कृते।
ओंकारनगरीं प्राप्ते लक्ष्म्यस्तु तव मङ्गळम्॥ ११ ॥

यः पठेत्सन्ततं लक्ष्मीमङ्गळम् भक्तिमान् नरः।
स स्यात्तस्याः प्रसादेन सर्वमङ्गळभाजनम्॥ १२ ॥

॥ इति श्रीमहालक्ष्मी मङ्गळं संपूर्णम् ॥

www.prapatti.com